# संस्कृतवार्ता:

**दिनाङ्क :-22.01.2025** **प्रात: - 06:55**

**अथ वार्ताः**

**पीएम- भारतीयजनतापार्टीति दलस्य**

प्रधानमन्त्री नरेन्द्र मोदी अद्य राष्ट्रीयराजधानीयां भारतीयजनतापार्टीति दलस्य बूथस्तरीयकार्यकर्तृभिः सह दिल्लीविधानसभानिर्वाचनाय दलस्य पूर्वप्रचारस्य अंशरूपेण नमो दूरभाषीय तन्त्रांशेन वार्तालापं करिष्यन्ति। कार्यक्रमस्य आरम्भः **"मेरा बूथ सबसे मजबूथ"** इत्यनेन भविष्यति। फरवरी मासस्य पञ्चमे दिनाङ्के दिल्ल्यां मतदानं सुनिश्चितम् अस्ति ,प्रधानमन्त्री श्रीमोदी निर्वाचनात् पूर्वं **मेराबूथ सबसे मजबूत** इति कार्यक्रमं सम्बोधयिष्यति। नामो एप् इत्यस्य राष्ट्रियसमन्वयकः भारतीयजनतापार्टीतिदलस्य नेता कुलजीतसिंहचहलः च अवदत् यत्, श्रीमोदी अद्य अपराह्ने एकवादने दलस्य बूथस्तरीयकार्यकर्तृभिः सह संवादं करिष्यति।

**महाकुम्भ-उपमन्त्रिमण्डल:**

उत्तरप्रदेशसर्वकारस्य मन्त्रिमण्डलस्य विशिष्ट सभा अद्य प्रयागराजनगरे भविष्यति। उत्तरप्रदेशसर्वकारस्य सर्वे चतुःपञ्चाशत् मन्त्रिणः अस्मिन् सत्रे उपस्थिताः भविष्यन्ति। अस्माकं संवाददात्रानुसारी पूर्वं मेला प्राधिकरणस्य सभागारे सभायाः आयोजनस्य योजना आसीत्, परञ्च संगमक्षेत्रे भक्तानां तीर्थयात्रिकाणां च असुविधां न भवेत् इति विचिन्त्य स्थानं परिवर्तितम्।

**डोनाल्ड् ट्रम्प**

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन व्हाइट्-हाउस इत्यत्र प्रत्यागमनस्य किञ्चित् कालाद् अनन्तरम्, जो बाइडेन् इत्यस्य अष्टसप्तति-नीतयः निरस्तीकृताः। वार्ताहरान् संसूचयन् असौ विश्वस्वास्थ्य-सङ्घटनात् निवृत्तेः अनेकानि कारणानि उल्लिखितवान्। अनेन आरोपितं यत् विश्वस्वास्थ्य-सङ्घटनं कोविड्-महामार्याः प्रकोपसमये कथं मार्गनिर्देशम् अददात् इत्येतस्मिन् विषये चीनदेशम् प्रति पक्षपाती आसीत्।

**महाराष्ट्रस्य मुख्यमन्त्रिणः**

दावोस-नगरे प्रचलिते विश्वार्थिक-मञ्चे महाराष्ट्रस्य मुख्यमन्त्रिणः देवेन्द्र-फड्नविस्-इत्यस्य उपस्थितौ महाराष्ट्र-राज्येन सार्ध-सप्तशताधिक-अष्टात्रिंशत्सहस्र -कोटि-रूप्यकाणां बहुषु सन्धिज्ञापनपत्रेषु हस्ताक्षरम् कृतम् । महाराष्ट्र-प्रशासनस्य कल्याणी-समूहस्य च मध्ये हस्ताक्षरिते प्रथमे सन्धिज्ञापनपत्रे रक्षा-विद्युत्-वाहन-क्षेत्राणि अन्तर्भवन्ति। अयं सन्धिः सार्ध- द्वि-शताधिक-पञ्चसहस्रकोटिरूप्यकाणां निवेशम् आकर्षयिष्यति तथा च गढचिरोली-नगरे चतु: सहस्रं यावत् कार्यस्थानानि सृजयिष्यति इति अपेक्ष्यते। महाराष्ट्र-सर्वकारस्य तथा च रिलायन्स् इन्फ्रास्ट्रक्चर् लिमिटेड् इत्यस्य च मध्ये रक्षाक्षेत्रे सार्ध-षोडश-सहस्र-कोटि-रूप्यकाणां मूल्यस्य द्वितीयं सन्धिज्ञापनपत्रम् हस्ताक्षरितम्। येन हि सार्धचतुश्शतोत्तर-द्विसहस्रं यावत् वृत्यवसरा: कल्पिताः भविष्यन्ति।

**प्रशासनम्-"बेटी बचाओ बेटी पढ़ाओ"**

प्रशासनं अद्य नवदिल्ल्यां **'बेटी बचाओ बेटी पढ़ाओ'** इत्यस्या: योजनाया: दशमं वार्षिकोत्सवं परिपालयिष्यति। कार्यक्रमं बालिकानां सुरक्षा-शिक्षा-शक्तिकरणाय च कृत-प्रयासानां एकस्य दशकस्य पूर्ते: प्रतीको वर्तते। महिलाबाल-विकासमन्त्रालयेन उक्तं यत्, कार्यक्रमेऽस्मिन् सशस्त्रबलानां, अर्धसैनिकबलानां, दिल्ली-आरक्षिबलस्य महिलाधिकारिण:, छात्रा:, आंगनवाड़ी-कार्यकर्तार: च भागं स्वीकरिष्यन्ति। मन्त्रालयेन उक्तं यत् आयोजनं अद्य आरभ्य मार्चमासस्य अष्टम- दिनाङ्कं यावत् प्रचलिष्यति, यस्य समापनं अन्ताराष्ट्रियमहिला-दिवसावसरे भविष्यति। एतादृशानां कार्यक्रमाणाम् आयोजनं राज्य-मण्डलीय-स्तरेऽपि भविष्यति। अवधेयं वर्तते यत् अस्या: योजनाया: आरम्भ: प्रधानमन्त्रिणा नरेन्द्रमोदिना पञ्चदशोत्तरद्विसहस्र-तमवर्षस्य जनवरीमासस्य द्वाविंशति-दिनाङ्के हरियाणा- राज्यस्य पानीपतस्थले कृतम् आसीत्।

**।।इति वार्ता:।।**